# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर/दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रिद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – ५** | गुणाः - ७० |
| विषयः – वेदः | **कोड – C.C.2.3.5** | समयः – ३:०० तः ६:०० |
| दिनाङ्कः – २९-११-२०१६ | सन्दर्भग्रन्थः – याज्ञवल्क्यशिक्षा | |

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितेषु श्लोकेषु कयोश्चिद् द्वयोः व्याख्यां लिखत।** ०८

(१) गान्धर्ववेदे ये प्रोक्ताः सप्त षड्जादयः स्वराः।
त एव वेदे विज्ञेयास्त्रय उच्चादयः स्वराः॥

(२) एकमात्रो भवेध्रस्वो द्विमात्रो दीर्घं उच्यते।
त्रिमात्रस्तु प्लुतोज्ञेयो व्यञ्जनं चाऽर्धमात्रिकम्॥

(३) अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्
शिष्याणामुपदेशार्थे कुर्याद् वृत्ति विलम्बिताम्॥

**प्रश्नः – २ मात्राकालविषये यथाशास्त्रं विवृणुत।** ०८

**अथवा**

**वर्णोच्चारणे के सन्ति चतुर्दशदोशाः यथाशास्त्रं विवेचयत।**

**प्रश्नः – ३ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** ०४

(१) गोत्रविचारः (३) संहिताध्ययने फलम्

(२) हस्तसञ्चालनविधिः (४) सप्तहस्तदोषाः

**प्रश्नः – ४ अधोलिखितेषु पञ्चप्रश्नाः समाधेयाः ।** ०५

(१) स्वरितस्य वर्णः कः?

(२) वैदिकछन्दस्सु सुप्रसिद्धछन्दः किमस्ति?

(३) के गान्धारस्वरेण रम्भमाणाः भवन्ति ?

(४) 'आणवम्' इति शब्दस्य कोऽर्थः ?

(५) मन्त्राणां मध्येऽवसाने च कालनियमः कः ?

(६) काकपक्षिविशेषः वर्णानामुच्चारणं कथं करोति?

(७) कः वेदाध्ययनफलं न प्राप्नोति?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ अधोलिखितेषु श्लोकेषु कयोश्चिद् द्वयोः व्याख्या विधेया।** ०८

(१) उदात्तं तु भ्रुवः प्रान्ते प्रचयं नासिकाग्रत।
हृत्प्रदेशेऽनुदात्तं तु तिर्यग् जात्यादिरीरितः॥

(२) ककारान्ते टकारान्ते ङणे तर्जनिकां नमेत्।
पञ्चाङ्गुल्यं पकारे च तकारे कुण्डलाकृतिः॥

(३) यथा बालस्य सर्पस्य निःश्वासो लघुचेतसः।

एवमूष्मा प्रयोक्तव्या हकारपरिवर्जिता ॥

**प्रश्नः – ६ स्वरितस्य भेदान् प्रदर्श्य लक्षणानि विवृणुत।** ०८

**अथवा**

**याज्ञवल्क्यशिक्षायाः वैशिष्ट्यं महत्वं च प्रतिपादयत ।**

**प्रश्नः – ७ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** ०४

(१) प्रादेशोद्देशः (३) प्रकान्तमुभयक्षेपम्

(२) ऊष्मणः स्वरूपभेदाः (४) प्रचये स्वरितविधानम्

**प्रश्नः – ८ अधोलिखितेषु पञ्चप्रश्नाः समाधेयाः ।** ०५

(१) याज्ञवल्क्यशिक्षायाः सम्बन्धः केन वेदेन सह वर्तते ?

(२) स्वारस्य लक्षणं किम् ?

(३) वर्णानां कति स्थानानि ?

(४) ऊष्मा कति विधाः ? के च ते ?

(५) के सन्ति अष्टौ स्वरभेदाः ?

(६) वेदाध्ययनसमये मुष्ट्याकृतिः कदा कुर्यात् ?

(७) जात्यस्वरस्योदाहरणं किम् ?

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ९ अधोलिखितेषु श्लोकेषु कयोश्चिद् द्वयोः व्याख्या विधेया।** ०८

(१) शुक्लवर्णानि नामानि आख्याता रोहिता मताः।

कपिलास्तूपसर्गाश्च कृष्णाश्चैव निपातकाः ॥

(२) आकाशस्था यथा विद्युत् स्फुटिता मनिसूत्रवत्।

एषच्छेदो विवृत्तीनां यथा बालेषु कर्त्तरी॥

(३) स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च।

स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वरम् ॥

**प्रश्नः – १० यथाशास्त्रं सन्धिभेदविषये विवृणुत।** ०८

**अथवा**

**याज्ञवल्क्यशिक्षानुसारं वर्णानां वर्ण-देवता-जातिविषये एकं निबन्धं लिखत।**

**प्रश्नः – ११ एकस्य टिप्पणीं लिखत।** ०२

(१) सन्धिः (२) स्वरभक्तयः

**प्रश्नः – १२ अधोनिर्दिष्टेषु द्वयोः लघूत्तरं यच्छ।** ०२

१) याज्ञवल्क्यशिक्षानुसारं कति स्वरवर्णाः ?

२) क्षत्रियवर्णाः के सन्ति ?

३) 'रोहित' इति शब्दस्य कोऽर्थः ?

४) लृकारस्य दीर्घत्वं के वारयन्ति ?

***